नं० ४९४८

नाम – मन्त्रमहोदधिः

कर्त्ता – महीधरः

पत्र संख्या – ७ पत्राणि सं० – ×

विषयः – तंत्रम्

𑆩𑆁𑆠𑇀𑆫𑆩𑆲𑆾𑆢𑆣𑆴𑆥𑇀𑆫𑆡𑆩𑆠𑆫𑆁𑆓𑆂

𑇔𑇙𑇔𑇘

ॐ गुरुपदाम्बुजमित्यादिना मन्त्रधारया
मानसस्नानं जपेदित्यादि पूजान्तरे गे
वक्ष्यति = २

लक्ष्म्या युतो नृहरिः मध्यमपदलोपी समासः १
श्रीनृसिंहाश्रमे

ॐ
श्री·
१

ॐ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ ॐ नमः सरस्वत्यै ॥ ॐ श्रीमल्लक्ष्मीनृहरिं महागणपतिं गुरुं
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिम् १ प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजं आवश्यकं विनि
र्वर्त्य स्नातुं यायात्सरित्तटे २ श्रौतेन विधिना स्नात्वा मन्त्रस्नानं समाचरेत् द्वारमस्त्राम्बुना प्रोक्ष्य गणेशं चो
र्ध्वतो यजेत् ४ महालक्ष्मीं दक्षभागे वामभागे सरस्वतीं पुनर्दक्षे यजेद्विघ्नं गंगां च यमुनामपि ५ पुनर्वा
मे क्षेत्रपालेशः सिन्धुं यमुनेऽपि पुनर्दक्षे च धातारं विधातारं च वामतः तदूर्ध्वे श्रीः शंखपद्मौ ततोऽर्च
द्वारपालकान् द्वारदेहलीं विधायेत्थं प्रविशेदर्चनमन्दिरं ७ उपविश्यासने नत्वा गणेशगुरुदेवताः
प्राणानायम्य तारेण एवं कुर्यात् भक्तो चैव ८ द्वात्रिंशता चतुःषष्ट्या क्रमात्षोडशसंख्यया देवार्चा यो
ग्यताप्राप्त्यै भूतशुद्धिं समाचरेत् ९ मूलाधारस्थितां देवीं कुण्डलीं परदेवतां बिसतन्तुनिभां विद्यु
त्प्रभां ध्यायेत्समाहितः १० मूलाधारात्समुत्थाय संगतां हृदयाम्बुजे सुषुम्णामार्गमाश्रित्य पादायजी
वेह देहबुजालं ११ प्रदीपकलिकाकारं ब्रह्मरन्ध्रगतां स्मरेत् जीवं ब्रह्मणि मे योजयेद्धंसमन्त्रेण साधकः
पादादिब्रह्मरन्ध्रान्तस्थितभूतगणं स्मरेत् लवर्णबीजाहुतिभिः शुद्धं तद्विधिरुच्यते १२ पादादिजा
नुपर्यन्तं चतुःकोणं सवज्रकं भूबीजाढ्यं स्वर्णवर्णं स्मरेद्देवनिमंडलं १४ जान्वाद्यानाभिचन्द्रार्द्ध
निभं पद्मद्वयाङ्कितं वंबीजयुक्तं श्वेताभमम्भसो मण्डलं स्मरेत् १५ नाभेर्हृदयपर्यन्तं त्रिकोणं स्व
स्तिकान्वितं रंबीजेन युतं रक्तं स्मरेत्पावकमण्डलं १६ हृदो भ्रूमध्यपर्यन्तं वृत्तं षड्बिन्दुलाञ्छितं यं
बीजयुक्तं धूम्राभं नभस्वन्मण्डलं स्मरेत् आब्रह्मरन्ध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरं हंबीजयुक्तमा

नतोद्वानो
वक्ष्यमाणान् ६

अस्त्राय फडिति
मिमंत्रितेन जलेन ३

१ दक्षवामयोः
२ दक्षे वामे
२

१२
पीतादि लमित्यादि
चतुःकोणादि ५

भूमण्डले पादेन्द्रियं गमनं घ्राणं गन्धो ब्रह्मा निवृत्तिः समानो गतश्चोद्देशोऽपि एवमष्टौ पदार्था स्थिताः एवं जलमण्डले हस्तो ग्रहणं ग्राह्य रसना रसविष्णु
प्रतिष्ठा दानाः ८ तेजसि पायुः विसर्जनं विसर्जनीयं चक्षुः रूपं प्रीव विद्या व्यानाः ८ वायौ उपस्था आनन्दः त्वक् स्पर्शनं स्पर्शः ईशानं शान्तिरपानाः ८
नभसि वाक् वक्तव्यं वदनं श्रोत्रं शब्दः सदाशिव शान्त्यातीता उदानः ८

काशमण्डलं प्रविचिंतयेत् १८ पद्भ्यां पायूपस्थ्यावाक् क्रमाज्ज्ञेया धरादिगाः स्वकीयविषयैर्युक्ता गम
नग्रहणादिभिः १९ घ्राणं च रसना चक्षुः स्पर्शनं श्रोत्रमिन्द्रियं क्रमाज्ज्ञेयं धरादिस्थं गंधादिग्रहणास्मृ
ते २० ब्रह्मविष्णुशिवेशानाः सदाशिव इतीरिताः धरादिभूतसंघे च ध्येयास्तन्मण्डलेषु ते २१ निवृ
त्तिश्च प्रतिष्ठापि विद्या शान्तिश्चतुर्थिका शान्त्यातीतेति पंचैव कला ध्येया धरादिगाः समानोदान
व्यानाश्चापानप्राणौ च वायवः धरादिमण्डलगताः पंच ध्येयाः क्रमादिमे २३ एवंभूतानि सं
चिंत्य प्रत्येकं प्रविलापयेत् भुवं जले जलं वह्नौ वह्निं वायौ नभस्यमुं विलाप्य खमहंकारे महत्तत्वेप
हंकृतिं महान्तं प्रकृतौ मायामात्मनि प्रविलापयेत् २५ शुद्धसंविन्मयो भूत्वा चिंतयेत्पापपूरुषं।
दक्षकुक्षिस्थितं कृष्णमंगुष्ठपरिमाणकं विप्रहत्याशिरोयुक्तं कनकस्तेयबाहुकं मदिरापानहृद
ये गुरुतल्पकटीयुतं पापसंयोगिपद्द्वंद्वमुपपातकरोमकं खङ्गचर्मधरं दुष्टमधोवक्त्रं सुदुस्सहं
पं वायुबीजं स्मरन्वायुं संप्रेर्यैनं विशोषयेत् स्वशरीरयुतं मंत्री वह्निबीजेन निर्दहेत् कुम्भकं परिजप्य
न ततः पापनरं दग्धं बहिर्भस्मसमुत्सार्य वायुबीजेन रेचयेत् २७ व सुधाबीजेन देहोत्थं भस्म सं।
प्लावयेत्सुधीः लं भूबीजेन घनीकृत्य भस्म तत्कनकाण्डवत् विशुद्धकनकाकारं जपन्बीजं वि हं
हायसः मूर्धादिपादपर्यंतान्यंगानि रचयेत्सुधीः २८ आकाशादीनि भूतानि पुनरुत्पादये।
ब्रह्मणः २ न्वितः सोहंमंत्रेण चात्मानमानयेद्धृदयाम्बुजे कुण्डलीजीवमादाय परसंवित्सुधामयं संस्था
प्य हृदयाम्भोजे मूलाधारगतां स्मरेत् २९ भूतशुद्धिं विधायैवं प्राणस्थापनमाचरेत् प्राण

न्यसेन्मण्डूकमाधारे स्वाधिष्ठाने ततः सुधीः कालाग्निरुद्रं नाभौ तु वाक्कूपं हृदये ततः आधारशक्तिमारभ्य हेमपीठावधि न्यसेत् दक्षवामांसयोर्वामोरु
दक्षोरुयुग्मयोः क्रमात् धर्मं ज्ञानं च वैराग्यमैश्वर्यं विन्यसेत्ततः वदने वामपार्श्वे च नाभौ दक्षिणपार्श्वके अधर्मादीन् प्रविन्यस्य हृद्यनंतमतो मुजे

आं ह्रीं प्राणस्थापने

ॐ स्थापनमाचरेत् प्राणप्रतिष्ठामंत्रस्य मुनयो जेशपद्मजाः २५ छंदऋग्सामयजूंषि प्राणशक्तिस्तु
देवता- पाशो बीजं त्रपा शक्तिर्विनियोगो मनुसंस्थितौ ऋषीन् शिरसि वक्त्रे तु छंदांसि देवतां हृदि श्
सौ बीजं पदोः प्राक् शक्तिं न्यसेत् कुर्यात् षडंगकं कवर्गनभआद्यैर्हृत् चुशाद्यैः शिरः स्मृतं टुश्रोत्राद्यैः शिखा
स्यात् तोक्षात् तु वाग्घारेतनुच्छदं २८ पवक्ष्याभिर्नेत्रमस्त्रं येनांतरेंद्रियैः आत्मने तान् मनून् गानि
ङ् कं खं घं गं आकाशवायुतेजोजलपृथिव्यात्मने हृदयाय नमः एव मन्त्रे वि ५= न्यसेदुदयादिष्यादिषु पंचमं प्रथमं पश्चाद्द्वितीयं च चतुर्थकं तृतीयमित्थं क्रमतो वर्गवर्णान् समु हं यं दं सं लं ६
च्चरेत् ७- यवर्गोप्येवमुच्चार्य नभःश्वेतोन्निर्मोभृगुः विमलश्चेति चोच्चार्याः क्रमाद्वर्णाः समवि
दः नभो वाय्वग्निवाभूमिर्नभआदयईरिताः शब्दस्पर्शरूपरसगन्धाः शब्दादयो मताः ४२
श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राणं श्रोत्रादयः स्मृताः वाक्पाणी पादपायूपस्था वागादयः पुनः
वक्त्रादानगमनविसर्गानन्दसंज्ञकाः वक्त्राद्याः वाग्घाविडमनोहंकारश्चित्तसंयुताः आरो
निरूपसंज्ञाः स्युरेवमक्षरैः षडंगकं नाभेरारभ्य पादांतं पाशबीजं प्रविन्यसेत् ४५ नाभ्यंतं हृदया आं ६
ह्रीं त्कांतं हृदंतं मस्तकान्तं क्रोणि त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि विन्यसेत् आत्मने हृदया यं त्वगात्मने नमः
क्रौं तानि यादिसप्तादिकान्यपि गंजः सर्घान्विताः काया प्राणं जीवादिकं भृग्वादिकं न्यसेज्जी रं असृगात्मने नमः
ह्रौं ओजआत्मने वमेतान् हृदयदेशतः यकारादयः सर्वर्णाः सर्वे श्वेतभूषिताः ४८ ततः समस्तमूले लं मांसात्मने नमः
नमूर्धादिचरणावधि विधाय व्यापकन्यासं विन्यसेत् पीठदेवताः मण्डूकश्चाथ कालाग्नि वं मेदात्मने नमः
रुद्र आधारशक्तियुक् कूर्मोनंतो धरा सिन्धुश्वेतद्वीपसुराङ्घ्रिपाः ५० मणिहर्म्यं हेमपी शं अस्थ्यात्मने नमः
षं मज्जात्मने नमः
सं शुक्रात्मने नमः

हं जीवात्मने नमः

क्षं धरासिंधुश्वेतद्वीपसुरांघ्रिपाः बिंदुः ३ हं प्राणात्मने नमः ४ मं मण्डूकाय नमः २

ॐ धर्मो ज्ञानं विरागता ऐश्वर्यं धर्मपूर्वास्तु चत्वारस्ते नञादिकाः । धर्मादयः स्मृताः पादाः पी-
ठगात्राणि चेतरे मध्येऽनन्तं तत्पद्ममानन्दमयकन्दकं संविन्नालं ततः प्रोक्ता विकारमयकेस-
राः प्रकृत्यात्मकपत्राणि पञ्चाशद्वर्णकर्णिका ५३ सूर्येन्दुपावकस्थमण्डलत्रितयं ततः सत्त्वरज-
स्तमः पश्चादात्मायुक्तोऽन्तरात्मना परमात्मा च ज्ञानात्मा ततो मायाकलादिके विद्यातत्त्वं परं तत्त्व
वह्नियो मे ६ कथिताः पीठदेवताः ५५ पूजने सर्वदेवानां पीठ तां परिपूजयेत् न्यासस्थानानि चैतेषां प्रारो
सौनुसारप्रथमाद्या ६ रेब्हिरचंने, शृंगोनन्तरे गेवक्तं तेसेंद्रु यर्णयुता स्मृताः प्राणशोक्तिस्ततः पूज्यास्त्र ष्टौ पीठस्य प्राक्नयः ५७
श्रां ह्रीं क्रों इतिपीठमंत्रः ८ हृदयांभोजपत्रेषु नवमीत्वधिकर्णिके जयाख्या विजया पश्चादजिता चापराजिता नित्या विला-
सिनी दोग्ध्री च घोरा मंगला तिमा पाशादिबीजत्रितयं प्रोक्तं पीठं दिशोन्ततः एवं देहमये पी- षड्हस्ता देवी
ठे ध्यायेद्देवीमखुप्रदां नवयौवनगर्वाढ्यां पीवरस्तनशोभिनीं ६० पाशांचापास्त्रकपालेसैणी पाशधनुःशूलानि वामहस्तेषु रक्तक
रक्तमयसमुद्रबाण ६ शूलं हस्तैर्बिभ्रती रक्तवर्णा रक्तो दन्त्यो नु रक्ताम्बुजस्थां देवीं ध्यायेत् प्राणशक्तिं त्रिनेत्रां पालांकुशबाणान् दक्षहस्तेषु -२
अष्टपत्रस्य षट्कोणे ध्यात्वैवं पूजयेत्तु ता प्रागन्तो वायुकोणेषु ब्रह्मविष्णुशिवान्यजेत् अ-
ग्निवारुणयोर्विष्णु वाणी लक्ष्मीर्हिमाद्रिजाः केसरेषु षडङ्गानि पत्रेष्वष्टौ तु मातरः ६४ ब्राह्मी। अन्यावरणेषु तु
माहेश्वरी चापि कौमारी वैष्णवी तथा वाराही च तथैन्द्राणी चामुण्डा सप्तमी मता अष्टमी तु महा- मध्यपूजकयोर्मध्ये
लक्ष्मीः प्रोक्ता विश्वस्य मातरः देवताः पूजेन प्राचीमध्ये पूजेक्रमपूज्ययोः ६५ इन्द्रादयस्तु दिग्दे- प्राची २
वः पूजनीया दिगीश्वराः इन्द्रः कृशानुः कीनाशो निर्ऋतिर्वरुणोऽनिलः सोम ईशाननामा

आं ह्रीं क्रौं यं रं लं वं शं षं सं हों ॐ हंसः हंसः ह्रीं ॐ हंसः मम प्राणा इह प्राणाः मम जीव इह स्थितः आं ह्रीं क्रौं यं रं लं वं शं षं सं हों ॐ हंसः हंसः ह्रीं ॐ मम सर्वेन्द्रियाणि
आं ह्रीं क्रौं यं रं लं वं शं षं सं हों ॐ हंसः हंसः ह्रीं ॐ हंसः मम वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॐ हंसः हंसः ह्रीं ॐ ७२

घोणं तत ऊर्ध्वं चतुर्मुखः ततदंष्ट्रादिकाः प्राणाः ष्ट्याद्दंष्ट्रादिदेवतयः वज्रेशक्तिं दण्डखड्गौ पाशांकुशा
गदेष्वपि त्रिशूलपद्मचक्राणि दशादिक्पालदेवतयः एवमिष्टा प्राणशक्तिं पश्चाच्छार्दूलसंयुतां
ध्यायन् हृदि करं धृत्वा त्रिर्जपेत्तु मनुं सुधीः वक्ष्ये धनाममन्त्रेस्तस्योद्धारं ध्यानतस्तु खावहं पाशमा
यो स्वर्णिं प्रोच्य यादीन्समेन्दुसंयुतान् ताराविते नभः सम पूर्णमंत्रं ततो जपा मम प्राणा इह
प्राणा मम जीव इह स्थितः मम सर्वेन्द्रियाण्युक्त्वा मम वाङ्मन ईरयेत् चक्षुःश्रोत्रघ्राणपादान्त्रो
णा इह समीर्य च ७२ आगत्य सुखं सूच्चार्य चिरं तिष्ठन्त्विति पठेत् वह्निजायां च समार्णां मंत्रमेनं।
पुनर्वदेत् ७३ प्राणप्रतिष्ठामन्त्रोयं स्मृतः प्राणनिधापने ममेत्यस्य पदस्यादौ पाण्याद्दीनिस्म
रेत् यंत्रेषु प्रतिमादौ वा प्राणस्थापनमाचरेत् ममस्थाने तस्य तस्य षष्ठ्यंतामभिधां वदेत् ७४
सबिन्दुर्वामकर्णस्थो हंसाकाशः सर्गभिर्गुरुः पुनः मायेति तारस्त्वायं मंत्रस्समाख्यातो मतः ७६ एवं
प्राणान्प्रतिष्ठाप्य मातृकान्यासमाचरेत् अकाराद्याः क्षकारान्ता वर्णाः प्रोक्तास्तु मातृका ७७ प्र
जापतिर्मुनिस्तस्या गायत्री छन्द ईरितं सरस्वती देवतोक्ता विनियोगोखिलाप्तये हलो बीजा
नि चोक्तानि स्वराः शक्तय ईरिताः मूर्ध्नि वक्त्रे हृदि न्यस्येदृष्यादीन्साधकोत्तमः पंचवर्गैर्युता
दिभिश्च षडङ्गानि समाचरेत् लौवद्दीन शशांकाढ्यह्रस्वदीर्घान्तरस्थितैः ८० सानुस्वारै
र्जातियुक्तैर्ध्यायेद्देवीं ततोम्बुजे पञ्चाशद्वर्णरचितांगभागां धृतेन्दुखण्डां कुमुदावदातां व
राभये पुस्तकमक्षसूत्रं भजे गिरं संदधतीं त्रिनेत्राम् ८१ ध्यात्वैवं पूजयेत्पीठे देवताः पूर्वमी
वराद्यास्सजोदच्यः पूर्णकौन्नभयेगामयोः अगस्त्यनान्यामाद्वैष्या २

ॐ ह्रं सः हंसः ह्रीं सः

४ अं कं खं गं घं ङं आं हृदयाय नमः इं चं छं जं झं ञं ईं शिरसे स्वाहा उं टं ठं डं ढं णं ऊं शिखायै वषट् एं तं थं दं धं नं ऐं कवचाय हुं ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट् अं यं रं लं वं शं षं सं हं लं क्षं अः अस्त्राय फट् ४

ह्रौं मातृकायोगपीठाय नमः २

रिताः पीठशाक्तीस्तु परिमरस्तान्वार्चयेत् मेधा प्रज्ञा प्रभा विद्या श्रीधृतिस्मृतिबुद्धयः
विद्येश्वरीति संप्रोक्ता मातृकापीठशक्तयः ८२ विंयइंगुरस्थं मंत्र युक्तिसर्गीद्युचमातृका:
योगपीठाय नतं तेनामनु रामनंदेष्ठाने मूर्तिसंकल्प्य मूलेन तस्यां वाणीं प्रपूजयेत् आदावंगा
निसंपूज्य द्वितीये पूजयेत्स्वरौ ह्रीं ह्रौं तृतीये वर्गांश्च वर्गशक्ति चतुर्थके व्यापिनीपालिनी।
चापिपावनी क्लेदिनी पुनः धारिणी मालिनी पश्चाद्धंसिनी शंखिनी तथा वर्गशक्तय इत्युक्ता:
पंचमेत्वष्टमातरः षष्ठे प्राक्तादयो देवाः सप्तमेवज्रपूर्वका: इत्थं संपूज्य देवीं प्रीन्यसेद्वर्णान्निजा
ंगके ८८ ललाटे मुखवृत्ते नेत्रे श्रुत्योर्नासा गंडयोः ओष्ठयो दंतपंक्त्यो श्च मूर्ध्नि वक्त्रे न्यसेत्स्वरान्
बाह्वोः संधिषु साग्रेषु कचवर्गौ न्यसेत्सुधीः टतवर्गौ पदोस्तद्वत्पार्श्वयोः पृष्ठदेशतः ९ः नाभौ
उदरे पवर्गं च हृदंसककुदे तथा न्यसयादि चतुर्वर्णान्णादिषट्कं ततो न्यसेत् हृदादिकरयोरंघ्र्योर्ज
ठरे वदने तथा सृष्टिन्यासे विधायैवं स्थितिन्यासमतः श्रृणु ऋषिश्छंद श्च पूर्वोक्तो देवता विश्व
पालिनी उपविष्टा वल्लभांके ध्यायेद्देवीमनन्यधीः मृगबालवरं विद्यामाक्षसूत्रे दधत्करैः
मालाविद्याल सद्दर्शांवद्वन्द्वोपः श्रीवागिर एवं ध्यात्वा डकारायान्वर्णांनंगेषु विन्यसेत् एलकादि
जानु पर्यंतं स्थितिन्यासोयमीरितः २५ न्यासे संहृतिसंज्ञे तु ऋषिश्छंदश्च पूर्ववत् संहारिणी
सपत्नानां शारदा देवता स्मृता अक्षसरकटंकं सारंकं विद्याहस्तां त्रिलोचनां चंद्रमौलिं कृपा

दंनमः दक्षबाहुमूले
खंनमः दक्षकूर्परे
गं मणिबंधे घंअं
गुलिमूले ङं दक्ष
अंगुल्यग्रे =८

इंनमः दक्षनेत्रे ईंनमः वामनेत्रे दक्षिणादिक्रमः सर्वत्र पंनमः दक्षपार्श्वे फंनमः वामपार्श्वे
यं त्वगात्मने नमः हृदये रं असृगात्मने नमः दक्षांसे लं मांसात्मने नमः वामांसे वं मेदआत्मने नमः ककुदि शं अस्थ्यात्मने नमः हृदादि दक्षहस्ताग्रांतं
षं मज्जात्मने हृदादि वामहस्ताग्रांतं सं शुक्रात्मने हृदादि दक्षपादाग्रांतं हं प्राणात्मने हृदादि वामपादाग्रांतं लं जीवात्मने हृदादि उदरांतं

ॐ परमात्मने
हृदादि सर्वांगे

जपस्थानभूमिं नवधा कृत्वा पूर्वादिसप्तकोष्ठेषु कचटतपयशवर्गान्,
ष्टमे लक्षौ इति विलिख्य मध्यकोष्ठमपि नवधा विधाय तत्रपूर्वादिषु
स्वरद्वंद्वं क्षेत्रनामा
दिवर्णो यत्रको
ष्ठे तद्देवदीप
स्थाने जपमि
ष्टिदम् ॥ ६

नत्कारं कमलस्थां गिरं भजेत् ध्यात्वैवं विन्यसेद्वर्णान्ध्याधानान्तान्विलोमतः सृष्टिन्यासेऽत्र सर्गान्ताम्
र्बिन्दुन्तिकास्थितौ विन्दुन्तासंहृतौ चैषा एवं वर्णागमप्रजने न्यासाः सर्वत्र नत्वेतावर्णावात्तास्फुटाः
सृष्टिन्यासे स्थितिन्यासे पुनः कुर्यात्प्रयत्नतः अन्ये तु मातृकान्यासाः कथ्याः प्रजातरंगके १०
मंत्रस्नानादि विधयो गद्यास्तत्रैव ते मया भारतीमेवमाराध्य भजेदिष्टान्मनून्सुधीः १ विष्णुः
शिवो गणेशोऽर्को दुर्गा पञ्चैव देवताः आराध्याः सिद्धिकामेन तत्तन्मन्त्रैर्यथोदितं आदौ देव
वश्यीकर्त्तुं पुरश्चरणमाचरेत् तीर्थादौ निर्जने स्थाने भूमिग्रहणपूर्वकं नवधा तां धरां कृत्वा पू
र्वादिषु समालिखेत् कोष्ठेषु सप्तवर्गांश्च लक्षौ मध्ये तथा स्वरान् क्षेत्रनामादिमो वर्णो यत्र को
ष्ठे भवेत्ततः उपविश्य जपं कुर्यान्नान्यस्मिन्दुःखदे स्थले ५ आमध्याह्नं जपं कुर्यादुपांशु वाच्य
मानसं हविष्यं निशि भुञ्जीत त्रिःस्नायी अभ्यंगवर्जितः अयतालस्य निष्ठीव क्रोध पाद प्रसा
रणं अन्यभाषा प्रजादींस्तु जपकाले त्यजेत्सुधीः स्त्रीशूद्रभाषणं निन्दां ताम्बूलं शयनं दि
वा प्रतिग्रहं नृत्यगीते कौटिल्यं वर्जयेत्सदा ८ भूशय्या ब्रह्मचर्यं च त्रिकालं देवतार्चनं
नैमित्तिकार्चनं देवस्तुति विश्वासमाश्रयेत् प्रत्यहं प्रत्यहं तावन्नैव न्यूनादिकं क्वचित् ए
वं जपं समाप्याथ तद्दशांशं होमं समाचरेत् १० तत्तत्कल्पोदितैर्द्रव्यैस्तद्विधानेन दीयते प्राणा
याम षडंगं च कृत्वा मूलेन मन्त्रवित् कुण्डे वा स्थण्डिले कुर्यात् संस्काराणां चतुष्टयम् ॥

त्रिषवणस्नानशीलः ९

अन्यैस्सह भाषणं ५

सम ३

पट् इतिमंत्रेण। ॐ ह्रीं ॐ २ हूं इति। २

ॐ मूलेनदत्त्वामुद्रेणप्रोक्षणंताडनंकुशैः १२ वर्मणाभ्युक्षिनाभिस्त्वालिखेद्यंत्रंतदंतरे वह्निकोणषड्
कोण अष्टदलभूमंदिरात्मकं मध्येतारपुटांमायांलिखित्वापीठमर्चयेत् मण्डूकात्परतत्वांतंपीठंशक्ती
र्जयादिकाः वागीश्वरीवागीश्वरयोर्योगपीठात्मनेनमः मायादिकःपीठमंत्रस्तयोस्तेनासनंदिशेत्
मांसाशिनोय यजेत्तौतारमायाभ्यांगन्धाद्यैरुपचारकैः लक्ष्मीनारायणौवर्चेद्वैष्णवेहोमकर्मणि १६ सूर्यकान्ताद
द्भूर्यत्तत्रभागः रणितःश्रोत्रियागारतोपिवा पात्रेणपिहितंपात्रेवह्निमापादयेत्ततः अस्त्रेणदापयतत्पात्रंवर्मणा
तमस्त्रेणत्यजे २६ द्याटयेत्तत अस्त्रमंत्रेणनैर्ऋत्येक्रव्यादांशंततस्त्यजेत् मूलेनप्रतोध्यत्वासंस्काराम्बतरस्मरेत
मूलेनेद्धूणं वीक्षणंध्यानपुरप्रोक्षणादत्तप्रोक्षणमाचरेत् परमात्मानलेनाथजाठरेणापिवह्निना स्मरन्नेकीव
फडितिप्रोक्षणं ह्निवीजाद्वैतन्यंयोजयेत्ततः २० ॐ तारेणचाभिमंत्र्याग्निं वंधयाधेनुमुद्रया अमृतीकृत्यसंरक्षे
ऊर्ध्वसाडनं दस्त्रमंत्रेणमंत्रवित् मुद्रयात्ववगुण्ठन्यात्कवचेनावगुण्ठयेत् ऊर्ध्वपरितत्तोवह्निंभ्रामयेत्त्रि
हुमितिसेचनं पूर्वपठन् २२ प्राप्यागताममतस्नातांनीलेन्दीवरधारिणीं देवेनभुज्यमानांतांस्मृत्वातद्योनिमण्ड ऊ४ स्थापने ३
ले ईश्वरेतोधियावह्निंस्थापयेदात्मसंमुखं मूलेनवार्णंचपठन्जानुस्पृष्टधरातलः रेफद्वीपेन्दु
संयुक्तंगगनंवह्निचैतततः तन्याहृदयांतोयंनवार्णोग्निनिधापने २५ विश्राणणाचमनंदेवीदेव
योर्ज्वालयेद्बहुरु चतुर्विंशतिवर्णेनमंत्रेणप्रपणादिभिः २६ चित्पिंगलहनहनदहदहपच
चहृयसर्वज्ञाज्ञापयस्वाहामंत्रोवेदभुजाक्षरः प्रदर्शयेज्ज्वालिनीमुद्रामुत्थायविहितांजलिः।

मणिबंधयुतौ हस्तौ प्रसृतांगुलिकौ करौ कनिष्ठांगुष्ठयुगले मिलितौ तौ प्रसारितौ ज्वालिनीनाममुद्रेयंवैश्वानरप्रियंकरी ॥

हूं वह्निचैतन्यायनमः ३ चित्पिंगल हनहन दहदह पचपच सर्वज्ञाज्ञापय स्वाहा = २

सचपावलयरं स्रूं छ्रूं श्रूं क्रूं ल्रूं यूं र्धूं छरेभ्योनमः लिंगे पितृभ्योनमः पायौ गंधर्वेभ्योनमो मूर्ध्नि इत्यादि ७ =

ॐ श्री - ५

श्लोकरूपेण मंत्रेण उपतिष्ठेद्धुताशनं अग्निं प्रज्वालितं वन्दे जातवेदं हुताशनं सुवर्णवर्णममलं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा = २
समिद्धं विश्वतोमुखं अथाग्निमंत्रं विन्यसेत्तद्विधानमुदीर्यते वैश्वाग्ने जातेतिवेदंते स्यादिहावह
लोहिताक्षपदान्सर्वकर्माणि ते तु साधय वह्निप्रियान्तो मंत्रोऽयं षड्विंशत्यक्षरान्वितः ॥१॥ ऋषिर्भृगु
र्देवता स्यादग्निर्गायत्रं पावकाः रं बीजं ठद्वयं शक्तिर्हवने विनियोजनम् ॥२॥ लिंगे पायौ मूर्ध्नि वक्त्रे
नासिके नेत्रे विलोमके वह्नेर्जिह्वास्वबीजाद्यान्न्यसेत्तद्देवतानमोन्विताः हिरण्या गगना रक्ता कृष्णा
प्रभयान्विता बहुरूपातिरिक्तेति जिह्वाः सप्त नमो मताः दीपिकानलवायुस्थाः सा यावर्णा विलोमतः
सेन्द्वाः सप्तजिह्वानां समानो बीजतां गताः ॥५॥ गीर्वाणाः पितृगन्धर्वयक्षनागपिशाचकाः राक्षसा
श्चेति जिह्वानां देवताः स्युः स्थले न्यसेत् सहस्रार्चिषे हृदये स्वस्तिपूर्णाय मस्तके उत्तिष्ठपुरुषायेति
शिखामंत्रायमीरितः धूम्रव्यापिने वर्म सप्तजिह्वाय नेत्रकं अस्त्रं धनुर्धराय इति षडंगानि समाचरे
त् मूर्ध्नि वामे सके पार्श्वके कटौ लिंगे कटौ पुनः दक्षपार्श्वांसके न्यसेन्मूर्तीरष्टौ विभावसोः तारा
ग्नेय पदाद्या ताश्चतुर्थी हृदयान्तिकाः जातवेदाः सप्तजिह्वो हव्यवाहन इत्यपि ॥७॥ अश्वोदरजसं
ज्ञोन्यस्तथा वैश्वानर आहुयः कौमारतेजाः स्याद्विश्वमुखो देवमुखावपि ॥८॥ ततोन्यसेन्निजे देहे पी
ठं हाटकरेतसः वह्निमण्डलपर्यन्तं मण्डूकादियथोदितं पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फु
लिंगिनी रुचिरा ज्वालिनी चेति हृप्राणाः पीठशक्तयः बीजं वह्न्यासनायेति हृदन्तः पीठमन्त्रकः ५

नमः

ॐ अग्नये जातवेदसे नमो मो र्धनीत्यादि

वरस्वस्तिकौ दक्षयोः अभय पात्री वामयोः २

एवं विन्यस्य पीठं तं पावकं चिंतयेत्ततो ४८ त्रिनेत्रमारक्ततनुं लसच्छक्तिवरं सुवर्णस्रजमग्निमीडे
वराभयस्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमूहयुक्तं ४९ एवं ध्यात्वार्चनं कुर्यान्मानसं विधिवद्बुधः
परिषिञ्चेत्ततस्तोयैः कुण्डं स्थण्डिलमेव वा दर्भैः परिस्तरेदग्निं प्रागग्रैरुदगग्रकैः प्रत्यगुदक्षिणासौ
म्याग्रेषु न्यसेत्त्रीन्परिधीन्क्रमात् पालाशान्बिल्वजांस्तेषु ब्रह्मविष्णुशिवान्यजेत् वह्नौ तत्पीठमभ्यर्च्या
वाहयेत्स्वहृदानले गंधादिभिः समभ्यर्च्य पूजयेत्पावकाहुतीः षट्सु कोणेषु मध्ये च जिह्वास्तद्देवता
यजेत् ईशानादिषु वाय्वन्तकोणेषु षडङ्गं पूजयेत् हिरण्याद्यतिरिक्ता ता मध्ये तु बहुरूपिणी ५०
केसरेष्वङ्गपूजा स्याद्दलेष्वष्टसुमूर्तयः मातरोष्टौ दलाग्रेषु भैरवाः सुलक्षणाः धरापुरे तु प्राक्षा
द्या वज्राद्यायुधसंयुताः एवमावरणैर्युक्तैः सप्तभिः पावकं यजेत् असिताङ्गो रुरुश्चण्डः क्रोध
उन्मत्तभैरवः कपाली भीषणश्चापि संहारश्चाष्टभैरवाः ५१ वामे कुशानुत्थाप्य नीर्यतत्रवृक्ष
निनिःक्षिपेत् प्रणीताप्रोक्षणीपात्रे आज्यस्थालीं स्रुचं स्रुवं अधोमुखानि चैतानि होमद्रव्य
तं कुशान् समिधः पंच पालाशीस्तत्पदपूपयोगियत् ५२ कृत्वा पवित्रे मूलेन प्रोक्षेत्तानि कुशा
म्भसा उत्तानानि विधायाथ प्रणीतां पूरयेज्जलैः तीर्थमंत्रेण तीर्थानि स्मरणात्तत्राहयेत्सुधीः
पवित्रे अक्षिताः तत्र निक्षिप्योत्प्लवनं चरेत् अथोदीच्यां निधायैतां प्रोक्षणीं तज्जलैः क्षिपेत् ह
वनीयद्रव्यजातमुक्षेत्तोयैः पवित्रगैः मूलेन मूलगायत्र्या यद्वा हृदयमंत्रतः दक्षिणे पीठ

गंगे च यमुने चैव इति ३ अंकुशमुद्रया २

ह्रां ह्रीं ह्रूं ४ ह्रां इच्छाशक्त्यैनमो मूले ह्रीं ज्ञानशक्त्यैनमः मध्ये ह्रूं क्रियाशक्त्यैनमः अग्रे

श्री ६

मासाद्यतत्रब्रह्माणमाह्वयेत् ब्रह्मणामाद्याः स्मृ(?)तयोष्टौ ब्रह्मणः पीठदेवताः तारहृत्पूर्वकोरे ऽग्नो ब्रह्मा रामेश्वरा
सनएजने ६ हस्ताभ्यां स्रुक्स्रुवौ धृत्वा तापयेत्त्रिरग्नि(?)षु (?) वामहस्तेनतौ धृत्वा दर्भदक्षिणमार्जये
येत् सं प्रोक्ष्य प्रोक्षणीतोयैः प्रतापयेत् पूर्ववत्पुनः न्यसेद्गौमार्जनान्ते भीस्तयोः शक्तित्रयं न्यसेत्
इच्छाज्ञानक्रियासंज्ञा चतुर्थीनमसान्विता दीर्घत्रयेणयुग्मोममपूर्वकं स्थानकत्रये हृदाहृच्चिना
सेच्छक्तिं स्रुवे प्राभुततत्स्रुतौ स्रुवत्रयेण संवेष्ट्य संपूज्य कुसुमादिभिः ऊर्ध्वपश्चिमसेदक्षिणे तयोः
संस्कार ईरितः अग्रेणोद्भिताया माज्यमस्थाल्यामाज्यं विनिःक्षिपेत् ६५ हृदेतितापनं प्रोक्तं दर्भ
युग्मप्रदीपितं आज्येक्षिप्वाहृदावह्नौ पवित्रीकरणं विदुः आज्यं नीराजयेद्दर्भदीप्रयुग्मेनवर्मणा
अभिद्योतनमुक्तं तद्दीप्तदर्भत्रयं चूतेः दर्शयेद्दक्षिणेद्योतो गृहीत्वा हृत पात्रिका सेयोज्याग्नौ तद्दक्षि
रान्सलिलं संस्पृश्य सुधीः अङ्गुष्ठानामिकाभ्यां तु दर्भौ वादाय निःक्षिपेत् दर्भद्वयं ग्रन्थियुतं हृदे =
तमध्ये विनिःक्षिपेत् वामदक्षिणयोः पद्मोस्तत्वा नाडीत्रयंस्मरेत् दक्षिणाद्भाग तो मध्यादुद्धृत्य हृ
दायहुतेसुधीः अग्नये,ग्निप्रियासोमाय स्वाहेत्यग्निनेत्रयोः जुहुयाद्दर्वी ताभ्यां स्वाहेत्य
क्षिणत्रतीयके पातयेदाहुतेः शेषमाहुतिग्रहणस्थले भूयोहृदादक्षभागादादायाज्यं स्रुवेणय
नेत् ७५ अग्नयेस्विष्टकृते तेनत्र मोहुटनमतं नरसिंहं विनाविष्णुमन्त्रेनेत्रद्वयं यजेत् नृसिं
हेन्यदेवेष्ववह्नेर्नेत्रत्रयं स्मृतं महाव्याहृतिभिर्व्यस्तसमस्ताभिश्चतेष्टयं ७७ आहुतीनांत्रयंपव

अग्नयेस्वाहा दक्षनेत्रे सोमायस्वाहा वामनेत्रे ४

हृदयायनमः इतिमंत्रेण ५

६

स्वाहान्तके   सत्वविकासकं २   आहुतिचतुष्टयं १

गौर्यां स्रुवाहुतिभिः स्रुचाभिरिति । ओमस्याग्नेर्गर्भाधानसंस्कारं करोमि स्वाहा

१ दशाहुतिस्कन्धेनैकैकं, एवं पुंसवनसंस्कार

द्रिमंत्रेण च ततश्चरेत् स्रुवाहुतिभिः स्रुचाभिरेकैकां संस्कृतिं चरेत् ओमस्याग्नेरङ्गसंस्कारं करो
म्यग्निवल्लभा इत्यमन्त्रजपनाभिधाने पुंसवने ततः सीमन्तोन्नयने जातकर्म कृत्वा ततश्चरेत्
वह्न्युपन्यस्समिदान्नालापनयने वसोः ८ जुहुयाद्देवाभिधानेन एवं वह्नेर्नामकर्मणः नामान्
तरमेतस्य पितरौ स्वर्पयेद्बुद्धि अन्नप्राशं ततश्चोलापनयोदारयोजने संस्कारः स्युर्विवाहा
तामस्तं तान्कुरु कर्मणि एकैकामाहुतिं जुहुयाद्धोजिह्वां मूर्त्तिभिः इन्द्रादिभिश्च वस्त्राद्यैर्द्वि
ढौ तैर्जुहुयात्ततः स्रुवेणाज्यं चतुर्वारं निधाय स्रुचि तां सुधीः अपिधाय स्रुवेणैतां गृहीयात्कर
युग्मतः तिष्ठन्मूलं तयोर्नाभौ कृत्वाग्रज्वलमेव क्षिपेत् वामस्तनेतं मूलेष्ठत्वाग्निमन्त्रेणासुधीः
जुहुयाद्वौषडंतेन सम्पन्नार्थमतन्द्रितः महागणेशमंत्रेण मुक्तेनदक्षधा ततः जुहुयाच्च समस्ते
न चतुर्वारं घृताहुतीः पूर्वं एवं युतं वीतपुण्डं बाणश्च सायकं मनयोर्मार्गणश्चेति विभागस्तन्म
नोः स्मृतः तारो लक्ष्मी गिरिसुता कामेश्वरो गणनायकः चतुर्थ्यंतो गणपतिर्वरो तेवरदेति च स
र्वां ते जनमिति पुनः कामे वशांतेत्वमानय स्वाहांतो वह्नियुग्मौ णौ महागणपतेर्मनुः एवं हुत्वा
ग्निसंस्कारं पीठदेवस्य पूजयेत् २० तत्रेष्टदेवमावाह्य मुद्राश्चावाहनादिकाः प्रदर्श्य वदनेत
स्य देवस्य वदने ततः मूलेन जुहुयात्पश्चान्नेत्रसंख्याघृताहुतीः वह्नेरेकीकरणं त्वग्निदेवयो
स्तेन जायते नाडीसंधानसिद्ध्यर्थं वह्निदेवतयोस्ततः जुहुयान्मूलमंत्रेण रुद्रसंख्याघृता

वागीश्वरी वागीशौ ४

ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा

ओं अस्याग्ने रामाग्नेः स्कन्दादि संस्कारं करोमि स्वाहा ३

गं स्वाहा ओं श्रीं स्वाहा ओं श्रीं ह्रीं स्वाहा ओं श्रीं ह्रीं क्लीं स्वाहा ओं श्रीं ह्रीं क्लीं ग्लौं स्वाहा ओं श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा

हुतीः इष्टदेवस्याहुतीनामेकैकमाहुतिं चरेत् ततस्तु मूलमंत्रेण दशधा जुहुयाद्धुतं ततः कल्पो
क्तद्रव्येण दशांशं जुहुयाज्जपात् होमं समाप्य कुर्वीत पूर्णाहुतिमनन्यधीः होमावशिष्टेना
ज्येन पूरयित्वा स्रुचं सुधीः पुष्पं फलं निधायाग्रे स्रुवेणाच्छाद्य ताम्पुनः उत्थितो वौषडंतेन मू
लेन जुहुयाद्बुधः १५ तद्द्रव्येणाहुतीनां च जुहुयाद्वाहुतिं पृथक् देवं विसर्ज्य हृदि वह्नेर्जिह्वा
गमूर्तिभिः जुहुयाद्याहुतीर्हुता प्रोक्ता ते प्राणा जलैः संप्रार्थ्यानेन मनुना नत्वा तु विसृ
जेद्धृदि भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मान्तरेऽपि संप्राप्ते सान्निध्यं कुरु सादरम् १६ — दक्षिणां दत्त्वा
वह्नेः प्रविश्य निःसृत्य प्रणीतां भुवि निक्षिपेत् विधिं विसर्जयेत्सम्यक् प्राग्वत्परिधीन्विन्यसेद्बुधः १७ — ब्रह्माणं विसृज्य होम १
एवं होमं समाप्याथ तर्पयेद्देवतां जलैः आवाह्यते दृष्टांशेन तर्पणादभिषेचनं १८ तर्पयामि
(मूलमुक्त्वा इष्टं तर्पयामि नमः) नमः स्वाहेति द्वितीयान्तं विष्टपूर्विका मूलान्ते तत्पदं देयं सिञ्चामीत्यभिषेचने १ ततो नानाविधैरन्नै
स्तर्पयेद्द्विजसत्तमान् इष्टरूपान्समाराध्य तेभ्यो दद्याच्च दक्षिणां एवं संपूर्णतामेति ब्राह्म
णाराधनाद्गुणां देवताश्च प्रसीदंति संपद्यंते मनोरथाः २ इति श्रीमन्मेचमहादयो म
हीधरविरचिते मन्त्रमहाद्याधिकथने नाम प्रथमस्तरङ्गः १